अधस्ती गोहिपैक्षे लक्ष्मीररिभिस्तौरिकेवृ॥६७॥गुरुर्लग्नेरविः षष्ठेरंध्रेचेंदुश्च पंचमवर्जितः
॥यस्यलस्यारिसेनाग्रेखलमैत्रीवनस्थिरा॥६८॥न्यायारिपुयमारोचे
छिन्नभाजः शुभग्रहाः॥प्रयाणेनृपतेर्यस्य हस्तस्थातस्य मेदिनी॥६९॥
भूगोलतनौवुधेधनेबलान्वितेयलोज्झिते॥चतुष्टयेष्ववाक्पतौ तदाग
तःप्रशास्यरी॥७१॥केंद्रगेणरविणाविलोकिते भागवे त्रिभववेश्मसंस्थि
ते॥धर्ममागेनिधनस्थितेःखलेर्भूपतिर्विजयभाग्गतेभवेत्॥७२॥व्यस्त
नु केंद्ररिपुगैःशुभग्रहैर्यस्यरिःकृतं खवर्जितैःपरैः॥रंदशियहरुवुआश्रिता
नृपःप्राप्नुयात्सवितते रथोद्धतु॥७३॥एकांतरक्षगतशुक्राद्धीमतस्तः

७७ शनेर्वर्ज्यं ॥ यातस्तदा नरेन्द्रः प्राप्नोत्यायुर्यशोलक्ष्मी ॥ ७४ ॥ बुधभागे वम
ध्यगते विधौ गतो राजा ॥ पुरुहूतयमदिशं वा पुरुहूतयमोपमो भवति ॥ ७५ ॥
वेश्मगे गोसिते इन्दुजोद्धूनगे निशाकरे ॥ भूपतिर्गतो यशोमालिनीं श्रियं भु
जेत ॥ ७६ ॥ प्रयाति यो विलग्नगे गुरौ स्मृतिस्थिते विधौ ॥ सिते रिःगे स
शास्त्यरीन्बृहस्पतिर्यथासुरान् ॥ ७७ ॥ क्रूरैः केन्द्रस्थानगैर्नास्ति सिद्धिः
सौम्यैः सिद्धिर्लाभदिशोन्मिश्रयेन ॥ मिश्रैः कार्यं सिद्धिमायाति कष्टात्
प्रश्नेलग्ने चिंत्यमेवं सुधीभिः ॥ ७८ ॥ नैष्ठ्यं तु ध्येयवक्रीतिहृगोपि विलग्नगः ॥
करोति बहुधा नाशं तद्धारोपि पियासतो ॥ ७९ ॥ ये जातके कोकक्षितिपा ७७ ॥

कुल्माषाः चित्तलमांसं मृगमांसं नवनीतं भुजंगमांसं, आमलकं
खिंनमाषाः लयोगेमहि भवतोयांति रिपून्विजेतुं ॥ तेषां त्रिकोपाग्निरुपेतिशांतिं विद्विषियापाशु जलप्र
वाहैः ॥ ८० ॥ एकेनापि ज्ञास्फुजिद्वा कुपतौ नायोगः प्रोक्तः केन्द्रगोलंजेषु ॥ राज्याभिष
ताधियोगाभिधानोन्नं सर्वे रेवयोगाधियोगः ॥ ८१ ॥ योगे नये नृपतौ यो रिपुं व्रजेति
क्षेमणते गमनमागमनेचकुर्युः ॥ क्षेमं यशो रिपुविनाशमथाधियोगे योगाधियोगगमनेत
नुं जय ध्यरित्री ॥ ८२ ॥ शकुनैर्निमित्तमनोभिरंगं द्वैरुदयादिशुद्धिरिह प्रतिपद्य ॥ रिपुर्वि
नगरं · षयं प्रतियो विजिगीषुर्ब्रजति मेत्यचिराद्विजयश्रीः ॥ ८३ ॥ निमित्तराशिजे रेक तेन
णां मनस्तथैकृतः ॥ अतो धिया सतां बुधैर्मनोविशुद्धिरिष्यते ॥ ८४ ॥ कुल्माषी तिस्तिल
तंदुलादधितथा गव्यं पयश्छागलं मांसं मसृणं विलोयनमतः श्वास्यं ततः पायसं ॥
वै हंगं पिशितं तिलोदनमतो द्विःषष्टिकान्नं कुमाद्यश्विन्याधुदुपुप्रियंगुकेमतः श्रित्रांड
जायाः फलं ॥ ८५ ॥ यावं कुलित्थामधुवाज्यमिश्रं मूलं कांबुसकून्वुकमलं च शाकं ॥ वि
डालमांसं पिशितं तथाजं यथेष्टमांसान्यथसक्तुमाषान् ॥ ८६ ॥ आज्यतिलोदनम

रत्ना

७८ स्य पर्यांसि शाकप्रभृति क्रमशः खलु भुक्त्वा ॥ हस्तिरथाश्वनरैः यदि राजा यातितदा स्युजयलक्ष्
मीकं ॥८७॥ मज्जिका सघृतपायसं तथा कांजिकं सतपयो दधिकृसादं ॥ क्षीरसक्तुभि
तकं तिलौदनं वारदोहदविधिः क्रमात्स्मृतः ॥८८॥ अर्द्धदलतंदुलौदनकं सर्पिषिह
वीं षिद्धि सुवर्णोपः ॥ तिलवारिवीजपूरकमांसभाषुत्र पिष्टिका श्चापि ॥८९॥ ति
लपिष्टकं दग्धलाजिशाकुमयमन्ल वृक्षपत्राणि ॥ प्रतिपत्प्रभृति भुक्त्वा प्रस्थाता
सिद्धिभाग्भवति ॥९०॥ हुत्वा वन्हिं देवतांश्च प्रणम्य शस्त्रायुक्तः स्वस्तिवाच्य द्विजें
द्रान् ॥ ध्यायन्वा शाश्वथीश्वरं स्वचेताः क्षोणीपालो निर्विकल्पं प्रयात ॥९१॥ यस्तु संप्र
स्थितो यात्रां ब्राह्मणामवमन्यते ॥ अध्वानं न प्रपद्येत क्लीबवेषस्तथैव च ॥ नासोत्र
तिनिवर्तेत तद्दंतेन जीवितं ॥९२॥ प्रमत्तो व्याधितो भीतः श्रांतः कुद्धो बुभुक्षितः ॥ ७८

यस्तु संप्रस्थितो यात्रां स्वभार्यो नाभिनंदति ॥ भार्या चेन्नाभिनंदेत रनं सप्राप्त निवर्तते ॥९३
अध्वानं न प्रपद्येत क्लीबवेषस्तथैव च ॥९३॥ कृत्वा तु मैथुनं राज्ञो प्रभाते यो भिग
च्छति ॥ नासौ तत्फलमाप्नोति कृच्छ्याद्विनिवर्तते ॥९४॥ यात्राकाले तु संप्राप्ते
मैथुनं यो निषेवति ॥ रोगार्तः क्षीणकोशश्च विनिवर्तेत वा न वा ॥९५॥ यस्तु सं
प्रस्थितो यात्रां निवर्तेत पुनर्गृहं ॥ कामवायदि वाकामं न स सिद्धिमवाप्नुयात् ॥९६
श्री स्नातो शुक्लोनुलिप्तः सर्वालंकारभूषितः ॥ शुक्लांबरधरः श्रीमान् अध्वगः सुरव
मश्नुते ॥९७॥ अपेक्ष्य कार्यं स्वयमेव प्रमाणे महीपतीनां निर्गमनमाहुरार्याः ॥ छत्रा
युधाद्यं मनसस्त्वभीष्टं प्रचापलं येष्टे जयिकं जयार्थी ॥९८॥ विशेषैरत्नकोशे
गंधपुष्पाक्षितं कुर्यान्मंगलं पूर्वयात्रिकं ॥ श्चोदेशे तनकुर्यात्प्रवाधानविधानते १००

७२ छत्रदंडाक्षमालाग्नीकमंडल्वजिनांबरं ॥ विप्राणाद्ब्रह्मसूत्रेण निर्गमे कार्य
साधनं ॥ १०१ ॥ क्षत्रयुग्मेथसंपत्तिरप्यियघ्याध्वजेनवा ॥ छत्राभरणपा
थेयैः खड्गेनाप्यर्थसंभवः ॥ १०२ ॥ शय्याशैयानैश्च पुस्तकायुधदर्पणैः ॥ नि नी३
र्गमः शोभनोनित्यं अभिप्रेतार्थसाधकः ॥ १०३ ॥ शंखमद्यौषधस्नेहलवणो
पानहोगुडः ॥ निर्गमे न प्रशंसंति यद्यप्युपहृतं भवेत् ॥ १०४ ॥ यानवाह
नसंनाहकार्योपकरणेषु च ॥ निर्गमेषु प्रशस्तेषु पश्चादुक्तं यथासु
खं ॥ १०५ ॥ प्रस्थानमाहुर्धनुषः शतानि पंचापरे केचिद्धनुषां शतार्धं ॥ ७२

स्वस्थानतः षड्दशभिर्धनुर्भिः गतः खलु प्रस्थित एवमन्ये ॥ १०६ ॥ ती
र्थ्यवेदारण्यधावृद्धो वा ब्रीहयस्त्रयः ॥ प्रमाणं मेगुलेस्याः क्रमे वितस्ति
र्द्वादशांगुला ॥ १०७ ॥ वितस्तिर्द्विगुणारत्नीस्ततः किष्कुस्ततो धनुः ॥
धनुः सहस्रे द्वे क्रोशश्चतुःक्रोशं तु योजनं ॥ १०८ ॥ स्वस्थानेत्रतोलिपर्यंतं धनुः प्र
माणं चत्वारो हस्तादंडसंज्ञकः ॥ रसत्र्यं च कृतं तथा क्षितीशो दिनानि नो सप्त च मंडली
कः ॥ यः प्राकृतः सोपि च पंचरात्रं भद्रेण यात्रापरतः प्रयोज्या ॥ १०९ ॥ समंततः षोड
शक्रोशानि भुंक्ते महीमंडलिकाभिधानः ॥ भूपालसंज्ञः शतयोजनानि ससार्वभौमः
सकलां धरित्रीं ॥ ११० ॥ अयुक्तमेतन्नतिभाति नूनं ज्योतिर्विदां युक्तिमनो वहूनां ॥ यात्रा

र॰मा॰

८० समाप्तिः खलु वांछितार्थफलस्य सिद्धोभियतं प्रदिष्टा ॥११॥ सौदामिनी
५२ गर्जितवर्षणेषु नाकालजेषु वसंमोरेद्रः ॥ असमराधाधुवमद्भुतेषु दिव्यां
तरिक्षक्षितिजेषु नूनं ॥१२॥ युद्धं ग्रहाणां परिवेषदंडकेतूदयो वरतुमिंदु
भान्वोः ॥ ग्रहोपरागः प्रतिभास्करश्च दिव्या विकाराः कथिता मुनींद्रैः
॥१३॥ संध्यामेघवेकुकुंभज्वलनानि तारापातस्तथाशनिनकगकालगर्जितैषु ॥ निर्घातरक्तकरकाररजसां चपातोनीहारशक्रधनुषान
५२ भसस्तुतोल्का ॥१४॥ मेरामुवः प्रतेपेनं ध्वजतोरणगांगंधर्वसंचित ८०

पुरंधरणीप्रकंपः ॥ अर्काशुभगचलनादिकृताशकोपः शाखातरोः प
ततिवायुरपिप्रचंडः ॥१५॥ मर्त्यैकजालमिवसंत्यकस्मात्वेशंतिगे
हेचकपोतकाधाः ॥ पिपीलिकाश्येनशिवाग्निपक्षीश्वगोमृगेणा चकु
जो विकारः ॥१६॥ कुतुःस्वभावप्रभवाभिजैतोसिदोषसर्गाः शुभदा भ
वंति ॥ अन्यत्र दृष्टाः प्रकृतेः स्वभावान शोभनास्तेनृपपतिप्रजानां
१७॥ शक्रमरुद्यमशक्रवरुणानलधनरक्षसां दिक्षु ॥ तिष्ठतिया
मार्धमरुस्तत्र गता जयस्यरिचक्रं ॥१८॥ पृष्ठस्याददाति जयं पुरत

मर्कटः। पक्षिविशेषः। मृगजातिः। पक्षिविशेषः। मृगविशेषः।

र॰मा॰
८१ अपराजयं रणे राज्ञः॥ दक्षिणस्थितोऽपि जयं पराजयं वामकरसंस्थः
॥१९॥ प्रागुत्तराग्निनैरृत्ययाम्यवारुणवायवे। ईशान्यं चक्रमादिष्यः
उदयंत्यर्धयामिकाः॥२०॥ छुछुका भवनगोधिका रक्ता पिंगलापि
कवधूकपोतकी॥ शुककाकी पुरुषसंज्ञिता शिवा वामतः खलु पि
या सतां जयः॥२१॥ कैः स्त्रौ भौ से ध्विं कैरौ वानरश्च श्वी कंठश्चापि पिं
कौ रव्यौ रुरु रैरुश्च। ये स्त्रीसंज्ञा दक्षिणास्तु प्रशस्ताः प्राकाः पूर्वैस्त्र
रिभिस्त्वप्रयाणे॥२२॥ भारद्वाजो नाकुलश्चाषकं जो छागौ बर्हि

मेषः। मयूरः ८१

घोरपड ससा आखल

दृष्टमात्रः शुभः स्यात्॥ गोधा सर्पशशकौ जाहकश्च यानरस्थः कर्क
सर्डी लौ सोऽपि नेष्टः॥२३॥ जाहका हिशशरसकरगोधा कीर्तनं शुभमु
दाहृतमोघैः॥ नोरुते न च विलोकनमेषां अन्यथा गदितमृक्षक ऋक्षकर
पीनां॥२४॥ श्वेतं गौ रांजनं वर्धनं मुकुरं वंशकूपश्यामेषाभीष स्त्री शब्दिते
स्नूयान पूर्णकलशं छत्राणि सिंहासनार्थदाः॥ वीणा केतन मीन पंकज
दृष्टधिस्त्री ज्यगोरोचनाः कन्या शंखक्षितौ वेश्ये वस्त्रकुसुम लेनो वि
प्राश्वरत्नानि॥च॥२६॥ प्रज्वलज्ज्वलनहंतितुरंगभद्रपीठं गणि

लोमकलशाः। कज्जलं। दर्पणः। सर्षप। सिंहासन।

कांकुशम्रत्ना ॥ अक्षतेक्षुफलचामरभक्ष्याण्यायुधानि च भवं
ति शुभानि ॥२७॥ भेरीमृदंगमृदुमर्दलशंखवीणावेदध्वनिर्मधुर
मंगलगीतघोषाः ॥ पुत्रान्विता च युवतिः सुरभिः सवत्सा धौतांबरो
पि रजको भिमुखः प्रशस्तः ॥२८॥ वसंतराजे विशेषः गच्छति येषु
रतस्तथैव दृश्यौ कीदृशः केनविदुच्यमाना ॥ सर्वाशिषश्चातिशयेन ता
भ्यः क्षितस्य तुष्टिर्विजयाय पुंसां ॥२९॥ सिध्येर्विरोवांजत्हिश्छिंधिभिं धिं
धिंत्यादयः शत्रुवधोद्घतानां ॥ क्वयासि मागच्छ तत्रैव मा याः

ये जनारंभनिवारणार्थाः ॥३०॥ स्थैर्ये स्थिरार्थी गमनं तदार्थी ह्वाक्या
न्निवृत्तिर्विनिवर्तनार्थात् ॥ लाभं भयं भंगममंगलं वा युद्धे तु तत्संति
पादनार्थात् ॥३१॥ आदाय रिक्तं कलशं जलार्थं यदि व्रजेत्कोपि सहा
ध्वगेन ॥ पूर्णं समादाय निवर्त्तते सोयथाकृतार्थः पथिकस्तथैव ॥३२॥
तृणतुषफणिचर्मांगारकार्पासपंकैर्लवणगुडवसास्थिक्लीबतैलौ
षधिश्च ॥ रिपुविटुसितधान्यव्याधिताभ्यक्ततक्रैः पतितजटिल
मत्तोन्मुंडवांतैर्नसिद्धिः ॥३३॥ मुक्तकेशकाषायीनग्नैर्धनतुंडिसि

र॰मा॰
८३

तैः॥ कु आ धवं ध्यार जके ईदृशैः सिद्धिर्न जायते॥ ३४॥ कुटुंब कलह गेह ज्वलनमातविं योषितां विडालसमरं क्षुतं स्वलितमंबरादे स्तथा॥ दुरुक्तमपि कोपतामहिषयोश्च युद्धं भवेत् प्रयाणसमये नृणामभिमतार्थविच्छित्तये॥ ३५॥ निषेधमग्रे क्षिणि दक्षिणे च धनक्षयं दक्षिणकर्णदेशे॥ तस्य पृष्ठिभागे कुरुते रिपुवृद्धिं क्षुतं हि कार्यं स्वमनादरोति॥ ३६॥ भोगाय वामश्रवणस्य पृष्ठे कर्णे च वामे कथितं जयाय॥ सर्वार्थलाभाय च वामनेत्रे जातं क्षुतं स्यात्क्रमतो

दधेवं॥ ३७॥ कार्यक्षयं वह्निभयं च हानिं प्रियागमं चान्नमय्रह सिद्धिं॥ कुलिंचलाभं च क्षुतं करोति पूर्वादिदिक्षु क्रमशः यामात्॥ ३८ उद्वाहमंगलोत्सवकल्याणाभ्युदयसूतकाशौचे॥ असमाप्ततुया त्रां न कुर्वीत जिगीषुः पुरुषः॥ ३९॥ मृगविहंगाश्च गताः प्रदक्षिणं महीभृतां वाञ्छितकार्यसिद्धये॥ मृगा व्रजंतः परमोजसंख्यया नृपाभिषेके शकुनाः प्रयाणवत्॥ ४०॥ वसंतराजे विशेषः॥ दक्षिणे नापि मृगः पुमांसमावेश्य नूवक्ति विनाशमेव॥ आयुष्यसंख्याज

र•मा•

८४ पिक्वस्मसाराजवामयाता अपिनप्रशस्ता॥१५२॥ पुष्येनगत्याम्मृगयो
रग्युग्माग्रदक्षिणंगोरम्मृगाः प्रयांति॥ समानशस्ता नच वामयाताः क्रूरैर्वि
मिश्रा नभवंति चेष्टाः॥१५३॥ आद्येविरुद्धेशकुनेप्रतीक्ष्यप्राणान्नृपः पंच
च षट्वयायात्॥ अंशेद्वितीयगुणान्नृतीये व्यावृत्यनन्नयगृहमभ्युपेया
त्॥१५४॥ जातेविरुद्धेशकुनेध्वनीनो व्यावृत्यकृत्वा करपादशौचं॥ आच
म्यवक्षीरतरोधरस्तान्निषण्णप्रपश्येच्छकुनांतराणि॥१५५॥ नृपपरविष
यप्राप्तोराजाहिजामरसज्जनद्रविणहरणेवेतः कुर्यान्नवाकुलयोषितां॥
द्विगजतुरगानातोंवृत्तन्यानूनभीत निरायुधान्प्रमुदितमनाः सैन्यः शस्ते
क्षणेस्वपुरंविशेत्॥१५६॥ इतिश्रीश्रीपतिभट्टविरचितायांज्योतिषरत्नमाला
यांयात्राप्रकरणं॥ अद्वितोवृत्तसंख्या १२८॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ८४

१६५

वृषभमिथुन

श्रीगणेशायनमः॥ धर्मोगृहस्थपदतो नपरोस्ति कश्चिद्यस्मात्स्थितः सखलु
योषितिशीलवत्यां॥ तस्याः सुलग्नवशतः किलशीललब्धिस्तस्मात्प्रवच्मि
नचिरेणविलग्नसिद्धिं॥ मेषोक्षवैणिकमृगाननकुंभसंस्थे प्रद्योतने क घो ३
रतलग्रहणंशुभाय॥ गीर्वाणमंत्रिणि मृगेंद्रमधिष्ठिते तु मासेधिकेन
त्रिदिनस्पृशिनोविमेच॥ २॥ गुरौसुराणामधिपस्यसिंहे विचोलबालबंधनावार ५
दि॥ कुर्वंतसिंहांशमतीत्ययाम्ये देशेचशेषेनचनर्मदायाः॥ ३॥ अन्य
त्रैराशावपिसंस्थितेचसिंहस्यभागे सुरराजमंत्री॥ तावद्विवाहव्रतबंध
नादिमंगल्यकार्यं विदुषानकार्यं॥ ४॥ नीषाढप्रभृति चतुष्टये विवा-

१६६

र॰मा होनो पौषे चैत्रे न मधुसंज्ञके विवाहे ॥ नैवास्तंगतवति भार्गवे न जीवे वृद्धत्वे
८५ न खलु तयोः शुभो बालभावे ॥५॥ वत्सो वर्षमनन्नमिष्टतिनृधारेभ्यो यनंचो
वर्षाशरत त्तरं स्त्रीणां मौनं मेहतुं विहाय मुनयो मोडव्यथिष्या जगुः ॥ चैत्रे प्रोज्झ्य परा-
शरः प्राणिपौषचंदो भाग्यदंत्याषाढादि चतुष्टयं न शुभदं केचिदूत्र
दिष्टं बुधैः ॥६॥ देशाचारतो व्यवस्था ॥ फाल्गुने पंते सिमासि माधवे ज्ये
ष्ठ नाम्नि धनपुत्रदो भवेत् ॥ सौम्ये रेः कृतसुखार्धमानदः कार्त्तिके च स ८५
हसि प्रकीर्तितः ॥७॥ अस्तमिते भृगुतनये नारी म्रियते बृहस्पतौ पुरुषः ॥
स्यादुभयो[illegible]रपि मरणं केतावुदिते करग्रहणे ॥८॥ अर्कानुकूल्ये सु

रसौ जैत्रजिते [illegible]वृद्धिं प्रपन्ने भृगुनंदने च ॥ भवंति नार्यः कृतसौख्यसंपत्सौ
भाग्यभाजः क्षतशत्रुपक्षाः ॥९॥ प्रागुद्गतः शिशुरहस्त्रितयं सितः स्यात्पश्चा
द्गतश्चाहमिह पंचदिनानि वृद्धः ॥ प्राक्पक्षमेव कथितो त्र वसिष्ठमुख्यैर्जी
वस्तु पक्षमपि वृद्धशिशुर्विवर्ज्यः ॥१०॥ पक्षं गुरुर्वृद्धशिशुः सितो दिव्यवस्थ
या केचिदिति ब्रुवंति ॥ कालोत्तरातुल्यानि दिनानि चैके सप्ताहमन्ये त्वपरे
त्रिरात्रं ॥११॥ स्यात्सप्तरात्रं गुरुशुक्रबाल्यं वृद्धत्वमुक्तं दशरात्रमेव ॥ वृ
द्धौ हि निष्टौ खलु तौ शिशुत्वे शस्तौ यतस्तावुपचीयमानौ ॥१२॥ जन्ममा
सि न च जन्मभे तथा नैव जन्मदिवसेपि कारयेत् ॥ आद्यगर्भदुहितुः

र॰मा स्तस्य वा ज्येष्ठमासि न च जातु मंगलं ॥१३॥ न ज्येष्ठे ज्येष्ठयोः कार्यं द्वंद्वना-
८५ र्योः पाणिपीडनं ॥ तयोरेकतरे ज्येष्ठे ज्येष्ठमासेपि कारयेत् ॥१४॥ स्वभा-
नु मित्रासितभौममंदशुक्रैस्तु षाररश्मिःसहितं गतानां ॥ दौर्भाग्यवैधव्यभ-
यानि धत्ते शुभं च चंद्रे भौलिभद्रीज्यविद्भ्यो ॥१५॥ ऊर्ध्वा रेखाः पंच तिर्यक्-
स्थिताश्च द्वे द्वे रेखा कोणयोरत्र चक्रे ॥ अग्नेर्धिष्ण्यं शंभुकोणे द्वितीये नो
ध्यो न्यसेभान्यतः साभिजिंति ॥१६॥ अंत्यः पादो वैश्वदेवाह्वयस्य विष्णो- ८५
र्धिष्ण्यस्याद्यनाड्यश्चतस्रः ॥ प्रोक्ता भुक्तिः साभिजित्संज्ञकस्य तत्स्थे रेख-
टे रोहिणीणां च वेधः ॥१७॥ चक्रे तस्मिन्नेकरेखास्थितेन द्येधिष्ण्ये विद्धं ग्र-
स्तं

हेण ॥ केश्चिज्जगाप्युच्यंतपादवेधो भानां विचिंत्यस्तत्र लाल निपातः ॥१८॥ वधू-
प्रवेशदाने च वरेण पाणिपीडने ॥ वेधः पंचशलाकाख्यो न्यत्र सप्तशलाकके ॥१९
त्य३ ॥ वेदैर्मार्धं [illegible] योरं घ्योरन्योन्यं द्वितृतीययोः ॥ क्रूरै रोपत्यजेत्पादं केचिद्दृष्ट-
मेणीषिणः ॥२०॥ ऋक्षं द्वादशगोभिरवनौ स्तुतृतीयं गुरुः [illegible] मुस्म
र्के मेजश्च पुरतो हंति स्फुटं लत्तया ॥ पश्चात्सप्तममिंदुजश्च नवमं राहुः
सितः पंचमं द्वाविंशं परिपूर्णमूर्तिरुडुपः संताडयेन्नेतरः ॥२१॥ चंद्रायु-
धोपग्रहलत्तितेषु धिष्ण्येषु चार्यैः कथितो विवेधः ॥ यावत्प्रमाणे च-
रणोस्ति खेटस्तावत्प्रमाणश्चरणो विरुद्धः ॥२२॥ क्रूरैर्भिन्नं क्रूरगं तद्व्यम्र
भिर२

र॰मा खं क्रूरराशौ तं क्रूरविहङ्गवनेष्टं ॥ यन्नोत्पातैर्दिव्यभौमान्तरिक्षैर्दुष्टं तद्वत्क्रू
८० रखेटाहतं च ॥ क्रूरैर्युक्तं त्रिविधोत्पातदुष्टं लायहिदृष्ट्यं मंगलं नो शुभे द्रु २
षु ॥ यावद्वक्त्र्यं शशिना तन्न भुक्त्वा पश्चात्तत्स्यान्मंगलं मंगलं च ॥ २४
यत्सूर्यभुक्तं दैवेन निष्टस्मृक्षं पुरास्थितं मध्यफलं मुनीन्द्राः ॥ यदन्ति भुक्तं
भं कर्मणीष्टं यदिनापि भोगं स्त्रगलं छन्नस्य ॥ २५ ॥ वक्रीखगभं पुर एव
दग्धं तत्पूर्वमृक्षं नहि धामितं स्यात् ॥ तत्राप्यतिक्रम्य यदेति पूर्वं सक्रू ८०
रदोषोपि च नास्ति तस्य ॥ २६ ॥ होराभ्यां धरित्री तनये त्वदृष्टं त्रिभिः सराकृग्र
हणोपपातं ॥ षड्भिश्च तुभिः शशिभोगदुष्टं युद्धं भवेद्दुष्टमिहं नोष्णु

भोगैः ॥ २७ ॥ पक्षान्तरेण ग्रहणद्वयं स्याद्यदा तदा द्वयग्रहणोपगं भं ॥ पक्षाद्विशु
द्धं भवति द्वितीयं ग्रहस्थितं शुध्यति भोगषट्कात् ॥ २८ ॥ षट्काष्टके मृत्युपरेत्य
हानिः पाणिग्रहे स्यान्नवपंचमे तु ॥ नेस्वे धनद्वादशके परेषु प्रेमा ॥ तिरेको हि
वधूवरस्य ॥ २९ ॥ मृत्युर्जन्मक्षयोर्नारी यदा षष्ठाष्टमे पतिः ॥ स्त्रियाः षडष्ट
मे गार्ग्यस्तदिष्टमनुमन्यते ॥ ३० ॥ एकराशौ धनापत्यसौभाग्यजननं स्मृतं ॥
एकर्क्षे यदि चैकांशो विवाहो नैव नश्यते ॥ ३१ ॥ समसप्तमे परस्परं मधिकाप्री
लेचर तिः सुखं धर्मतुष्टिः ॥ दशमे च तुर्थे च तथा वित्तान्यैकादशे तृतीये च ॥ ३२ ॥
भुवनपतिसुहृत्वं स्यात्तथैकाधिपत्ये यदि भवनवशात्वं चैव षड्द्वाष्टकेपि ३३

र.मा शुभकृद्विवाहोन्योन्यताराविशुद्धो यदि खलु फणिचक्रे स्यान्न नाडी
८८ समाजः ॥ ३३ ॥ नाड्यः स्तिस्रोन्यस्तु निःशेषदि[illegible]स्त्रिषु भ्योश्विन्यादि
भ्य एव प्रसूतोः ॥ सापीकारास्तत्र नाडीसमाजो नक्षत्राणामेकनाडी
स्पृशां स्यात् ॥ ३४ ॥ हित्वा सिंहमानुषाणां विहीयाभक्ष्यास्तेषां तोय धे ४
ज्ञातो हरेस्तु ॥ वश्यास्त्यक्ता वृश्चिकं चेवमन्यत् वश्यावश्यं विद्धि लोके ८८
प्रसिद्धं ॥ ३५ ॥ मृत्तिर्विधनता धनं सहज संक्षयं पुत्रकृत्कं प्रियस्य पुरमो
न्नतिर्विधवता चिरं जीविता ॥ शुभ ॥ क्षितिरशीलता विधिया ता विर
थं स्यात् तनुप्रभृति पुरस्थितेम वति भास्करे योषितां ॥ ३६ ॥ पापा ■

१७६

युति

मृत्युनिरर्थसंपद्भयोः प्रीतिश्च बंधुन्नेतिर्वैपुत्र्यं चसवैरतो चनियतं सा फल
तोत्मक्षयः ॥ स्त्रीसूतिः परकर्मकृत्यमधिकालब्धिः क्षयः संपदो स्यादिदा
धुंदयात्स्रवे चकथिते बधुक्षयः केश्चन ॥ ३७ ॥ पंचत्वेहि दरिद्रता सधन
ता स्वभ्राट्वैरं कृतानुसन्तिर्यदितोन्नति कुचरिता सन्तिः श्वरता[illegible]तिः ॥ सुर४
स्याद्भर्तुः प्रतिकूलता मिषरुचिर्धिना निरर्थक्षयो नारीणामुदयादिवर्ति
नि महीपुत्रे विवाहोत्सवे ॥ ३८ ॥ सौम्ये भर्तृपरायणा कृत्रहिणी स्यात्स्वामि
पक्षाश्रिता बंध्या श्वश्रू चरकृतान्विता चविजिनप्रद्वेषिपक्षा तथा ॥ बंध्या च
सुभिरुद्ध्रिता कृतिनी मायाविनी चक्रमाद्दूरिद्र व्ययवती बहुव्ययपरा

१७७

र॰मा॰ लग्नादिभावकल्पिते॥३९॥स्वामीष्टाधनभाग्गिनीप्रमुदिता दुव्यान्विता-
८१ स्वाम्यज्ञानस्वारिर्दयितो द्विष्टा च विगतप्राणा रता प्रेयसि॥ सिद्धार्था
विभवान्विता च धनिनी भावेषु लग्नादिषु स्यादत्र प्रमदा पुरो धुसि
नासीरस्यननंक्रमात॥४०॥ मनोभीष्टा भर्तुर्धनचयरता दैवरता
कुले द्वासमुन्ना विहितबहुवैरान्यनिरता॥ व्ययसुर्धमासक्ता सूक्तन
निरता ऋद्धिविभवा निरर्था शुक्रे स्याद्युवतिरिह लग्नप्रभृतिषु॥४१॥ ८१
स्यात्सुश्चल्यधनार्थवत्यथ पयोहीना च हद्रोणी निर्द्वेषा निजगर्भपा गि॰२
तनरता नीरुक्च भग्नव्रता॥ दुःशीला बहुवित्तवत्यतितरां पानप्रस

नै

क्तांगना प्राग्लग्नाद्विनेदनधीरविनास्वर्भानुना चक्रमात॥४२॥ त्याज्या
शु॰कें॰२ लेऽशोदैयोमेदोस्याः [illegible] दुलग्नपाः॥ रंध्रे चंद्रादयः पंच सर्वेस्तेज्यगुरू स
मौ॥४३॥ हिबुकधर्मसुतोदयकर्मरुत्रिदशराजगुरौ यदि वा सिते॥ यद
शुभं शुभतां समुपैति तत् शुभफलं नितरामपि वर्धते॥४४॥ दोषाणां श
तमपहंति सोमपुत्रः केंद्रस्थो द्विगुणमपहाय दश्य मूर्तिः॥ दैत्येज्यो द्विगुण
मिदं पुनर्बलीयान् आचार्यः शमयति लक्षमप्यवश्यं॥४५॥ पंचादिभिर्व्यो
मचरैर्मुनींद्राः शुभग्रहैः शोभनमामनंति॥ चतुर्भिरप्येंबरगे विलग्नाद्
क्राले च षष्ठादिव लोपपन्नैः॥४६॥ अनिष्टफलधाम गः शुभफलो ग्रहो

र॰मा वीक्षितः स्फुरद्गुरुः सितेंदुजौ बलयुतैरपापैर्यदा ॥ तनुप्रभृति पंचभिर्गग
१० नगैः शुभं शोभनं हि मा शुगुरुभास्करे विरहितं हितं नो भवेत् ॥ ४७ ॥
कोदंडतौलिजितुमेप्रमदाशकेषु प्राप्नोति सौख्यमधिकं दयिता स्वभ
र्तुः ॥ शेषेषु सत्स्वपि तथा च वधोज्झिता स्याच्चापेधिकोऽभिवेदं स्वेवदं भि ४
त्ति के चित् ॥ ४८ ॥ उदयगतनवांशः स्वेशदृष्टो युतो वा न भवति यदि मृ १०
त्युः स्यात्तदानीं वरस्य ॥ परिणयनसमये चेन्नैधनस्तोदयांशः स्वपति
सहितदृष्टो मृत्युकारी सवध्वाः ॥ ४९ ॥ नष्टा स्यादृष्टा विदुषा कदाचिदुल्लं
घनीयाः कुल[illegible]देशधर्माः ॥ मूलं हि तेषां श्रुतिवेदशाखाभ्यां न धर्मैः

स्थितिभंगदोषात् ॥ ५० ॥ प्रायेण गौडाः सहहीनवर्णैः प्राच्याश्च मं
ध्यासमयेंविवाहे ॥ शंसंति यावत्समुपैति शांतिं नगारवुरालवा
तरजोऽग्नितांतं ॥ ५१ ॥ गौडाः सूर्यं गोचरेणाप्रशस्तं वां छं स्यायें दा
क्षिणात्या विवाहे ॥ लाटाः प्रायः स्थानवीर्याश्रिताः स्युरग्वत्या
नोगोचरेगानप्रयाणे ॥ ५२ ॥ रे शास्त्रस्वरूपं बहवोऽप्युवुधा वदंति
पश्चानुमतं हि तं न ॥ ॥ देशं गतोप्येक विलोचनानां निमील्य
नेत्रं निवसन्मनीषी ॥ ५३ ॥ प्राजापत्य ब्राह्मदैवार्षसंज्ञाः कु
लेषूक्तेष्वेव कार्या विवाहाः ॥ गांधर्वाख्यश्चासुरो राक्षसश्चापि

र॰ मा॰

५१ राचो वा सार्वकालं विधेयः ॥ ५४ ॥ ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृ
ता ॥ गृहस्थधर्मसिध्यर्थं प्राजापत्यः स उच्यते ॥ ५५ ॥ यज्ञस्थऋत्विजे क
न्यादानं दैवः प्रकीर्तितः ॥ गृहीत्वा गोद्वयं कन्यादानमार्षः स उच्यते ॥ ५६ ॥
रो॰४ आसुरो द्रविणादानात् गांधर्वः समयान्मिथः ॥ राक्षसो युद्धहरणात् पैशाचः
कन्यकाछलात् ॥ ५७ ॥ कृतकौतुकमंगलचारुवपुर्मधुपर्कविधेः परं तस्क
वरः ॥ ज्वलिताग्निसमक्षमवाप्य वधूं समुपैति शुभाशुभमेव ततः ॥ ५८ ॥
॥ इति विवाहप्रकरणं समाप्तं ॥ ॥ ओं यथ्ययक्षीशकचंद्रताराबलानि
शास्त्रादवगम्य सम्यक् ॥ आयुर्धनारोग्ययशोभिवृध्यै गृहं गृहस्थो विद
धापयीत ॥ १ ॥ निर्याणपत्तनग्रामगृहादीनां समासतः ॥ विशोपीतासु भू ९ ॥ १ ॥

क्षेत्रमादौ परीक्षेत गंधवर्णरसप्लवैः ॥ २ ॥ श्वेताशस्ता द्विजेंद्राणां रक्ता भ
मिर्मतीभृतां ॥ विशोपीतास्तु शूद्राणां कृष्णान्येषां तु मिश्रिता ॥ ३ ॥ मनसश्चक्षु
षोर्यस्यां संतोषो जायते भुवि ॥ तस्यां कार्यं गृहं सर्वैरिति गर्गादिभाषितं ॥ ४ ॥ गृ
हमध्ये हस्तमितं कृत्वा श्वभ्रं प्रपूरितं च पुनः ॥ यद्यूनमनिष्टं तत्तु समं समं धन्यम
धिकं यत् ॥ ५ ॥ जलोत्तमप्रस्तरांतं वा पुरुषांतमथापि वा ॥ क्षेत्रं संशोध्य चोध्रुत्य शल्यं
सदनमारभेत ॥ ६ ॥ कपिशीर्षप्रमाणैश्च ग्रावाणैः पूरयेद्दृढं ॥ खातं तत्र समे कृत्वा
ततः प्राचीं प्रसाधयेत् ॥ ७ ॥ प्रासादसदने लिंगद्वारकुंडविशेषतः ॥ दिङ्मूढे कु
लनाशः स्यात्तस्मात्संसाधयेद्दिशः ॥ ८ ॥ यत्नेसमक्षितितलेखलु कंटकस्य श
कोः प्रभाविशतिनिःसरतीह यत्र ॥ तत्रापरैंद्र ककुभौ क्रमशो भवेतां तन्मत्स्य
पुछमखनः किलयाम्यसौम्ये ॥ ९ ॥ धीहृद्धिदे ॥ यत्नेसमक्षितितले तरवस्थि

र॰ मा॰ तस्य तुल्यायमूलपरिधेः सगुणस्य शंकोः॥ भा द्वादशांगुलमितेः प्रविशत्यपैति
९२ यत्रेक्रमाद्वरुणशक्रदिशो मतेते॥१०॥ यात्स्या पादमलं नाभिस्तस्मादध्यंगुल
त्रये॥ कुक्षिस्थस्तस्मिन्यसेत्कं कुं पुत्रपौत्रार्थवृद्धये॥११॥ पुष्यध्रुवमृदुस्वाती
हस्तवासववारुणे॥ प्रथमो वेश्मनां तत्र प्रारंभः सद्भिरिष्यते॥१२॥ सूत्रभि
त्तिशिलान्यासं स्तंभस्यारोपणं तथा॥ पूर्वदक्षिणयोर्मध्ये कुर्यादित्याह क
श्यपः॥१३॥ स्तंभोपरि यदोलूककाकगृध्रादिपक्षिणः॥ व्यालादयश्च ति
ष्ठंति तदा कर्तुर्न शोभनं॥१४॥ तस्मात्स्तंभोपरि छत्रं शरावं वैकं करीतु वा॥ ९२
धारयेदथवा शस्त्रं तत्र रत्नानि निक्षिपेत्॥१५॥ ध्वजो धूमोथ सिंहश्वा सौरभेयः

१८४

खरो गजः॥ ध्वांक्षश्चेति क्रमेणैव मायाष्टकमुदाहृतं॥१६॥ विस्तार आयाम गु
णेष्टभक्ते यः शेषमायः समभवेध्वजादिः॥ गृहेषु चाया विषमाः प्रशस्ताः स्वस्था
नगाः सर्वगतो ध्वजस्यात्॥१७॥ न हस्तमानेन गुणान्वितं स्याद्यदा तदा तद्व
पितो कुत्स्या॥ दलत्वथ हस्तायदि वांगुलानि प्रसाधयेत्क्षेत्रफलं शुभार्थी॥१८
द्वात्रिंशद्धस्तविस्तीर्णं मध्ये ब्राह्मणमंदिरं॥ प्रत्येकं क्षत्रियादीनां चतुर्हस्त
विहीनकं॥१९॥ वखाद्रिरसबाणांशैरायतं चोभयोरपि॥ वर्धितं विषमैर्हस्तैरा
यव्ययविशुद्धये॥२०॥ अष्टोत्तरशतं हस्तविस्तीर्णं राजमंदिरं॥ आयते
तच्चतुर्थांशेन सप्राकारपरिवेष्टितं॥२१॥ एकादशकरादूर्ध्वं यावद्द्वात्रिंशह॰

१८५

श्री मा स्तके॥ तावदायादिकं चिंत्यं तदूर्ध्वं नैव चिंतयेत्॥२२॥ गृहेषु कर्तृहस्तेन
१३ मानं स्वामिकरेण वा॥ देवतानां तु धिष्ण्येषु कर्तृहस्तेन केवलं॥२३॥ ध्वजे
ला वह्निर्धूम्रः स्यात् धूमे तापश्च नित्यशः॥२४॥ सिंहे च वि[illegible]पुलो भोगाः शु
नि स्यात्कलहो महान्॥२४॥ वृषभे धनधान्यं च खरे वैदुष्यचिंतता॥ ग
जे भद्राणि पश्यंति ध्वांक्षे च मरणं भवेत्॥२५॥ ध्वजो हरौ तौ च गजे वृषे
षो ते वृषे हि नान्यत्र समाश्रितः स्यात्॥ प्रत्यक्ध्वजे द्वारमथोक्षिणपूर्वहरावु
दक्स्याद्द्विरदे च याम्यां॥२६॥ सर्वद्वारे ध्वजो देयः पश्चिमास्यं विना हरिः॥
प्राङ्मुखे दक्षिणास्ये च गजः पूर्वामुखे वृषः॥२७॥ खेटकर्पटको

क्षेषु वृषः सिंहो गजः शुभः॥ वापीकूपतडागादौ गजो देयो विचक्षणैः॥२८
आसने योजयेत्सिंहं शयने चैव कुंजरं॥ वृषं भोजनपात्रेषु दद्याच्छत्रा
दिषु ध्वजं॥२९॥ महानसेग्निशालायां गृहे चाग्न्युपजीविनां॥ धूमं दद्याद
थो ध्वानं यवनांत्यजमंदिरे॥३०॥ खरो वेश्याजने योज्यो ध्वांक्षः सेत्यकुटुं
बिषु॥३१॥ वृषं सिंहं गजं दद्यात्प्रासादपुरमंदिरे॥३२॥ वस्त्रे ध्वजः धर्मशालायां
कुंभे स्तंभे ध्वजो ध्वजः॥ गोगजौ भूगृहे साधारणे तृणगृहे शुभौ॥३३
यंत्रे शस्त्रे रथे सिंहो भांडारे च शुभो ध्वजः॥ धान्ये बुरुखाने गोश्वेभशा
लायां वृषभः शुभः॥३३॥ नाद्यो भोगो द्वाहवे यो गजसिंहवृषाः शुभाः॥

रा·मा सर्वे स्वाभिमुखाः श्रेष्ठा मध्यमास्तु पराङ्मुखाः ॥ ३४ ॥ दैर्घ्येन वांशनान्परि
१८ कल्प्य सव्यं द्वारं स्तुभं प्राक् त्रिचतुर्थभागे ॥ चतुर्थषष्ठे दिशि दक्षिण
स्यां पश्चाच्चतुः पंचमके तथोदक् ॥ ३५ ॥ द्वारस्योपरि यद्द्वारं द्वारं द्वारस्य
संमुखं ॥ न कुर्याद्व्ययदं तस्मात्सततं तद्दरिद्रकृत् ॥ ३६ ॥ अथाहतं क्षेत्र
फले विभक्ते भसंख्ययाशेषमवेहि धिष्ण्यं ॥ धिष्ण्ये विभक्ते वसुभिर्व्ययः
स्याद्व्ययमल्पव्ययमालयं सत् ॥ ३७ ॥ आश्विन्यादित्रयं मेषे सिंहे प्रोक्तं १८
मघात्रये ॥ मूलादित्रितयं चापे शेषेषु स्याद्द्वयं द्वयं ॥ ३८ ॥ तारास्यास्ते सभं
स्वामिधिष्ण्ये नंदभाजिते ॥ उद्वाहवद्राशिकूटं विचार्यं स्वामिगेहयोः ॥ ३९
क्षेत्रफले गजगुणिते खयमाप्ते भो जिते भवत्यायुः ॥ आयुषि पंचविभक्ते

मान्मृहा भूतविश्लेषः ॥ ४० ॥ व्ययान्विते क्षेत्रफले गृहस्य ध्रुवादिनामा
क्षरमिश्रिते च ॥ त्रिभिर्विभक्ते क्रमशोंऽशपः स्यादिंद्रो यमो भूपतिरंत
कोऽसन् ॥ ४१ ॥ ध्रुवं च धन्यं च जयं च नंदं खरं च कांतं च मनोरमं च ॥ सुव
क्रं संज्ञं खलु दुर्मुखाख्यं क्रूरं विपक्षं धनदं क्षयं च ॥ ४२ ॥ आक्रंदसंज्ञं
विपुलाव्हयं च स्यात्षोडशं चेद्विजयाभिनंदनं ॥ इत्येकशालानि गृहा
णि विंद्यात्प्रस्तारमेषां मधुनाभिधास्ये ॥ ४३ ॥ स्थापयेल्लघुमे पदं स्याद धोगुरो
धो परि तथैव पूरयेत् ॥ पश्चिमं तु गुरुभिः पुनः पुनः सर्वलघ्ववधिरित्य
यं विधिः ॥ गृहनामाक्षराण्यष्ट गो भवार्के मनुत्रये ॥ प्रोचुस्त्रीणि न

गावेदाः शेषांके ध्वजस्य रहयं ॥४५॥ पिंडं स्वांशं वेदनिघ्नं विभक्तं नंदैः शेषं राशयो
धाम्नियाताः ॥ अंशोशैः शेषाद्धतो भपभक्तः शेषं विंधान्नाम सख्याः क्रमाद्धा ॥४६॥
चतुर्भिर्गुणितं क्षेत्रं फलं षोडशभाजितं ॥ शेषं ध्रुवादिकं ज्ञेयं स्वप्रनामयथाक्र
मं ॥ ४७ ॥ द्वारादिकं द्वितयं वेदावसवः प्रदक्षिणं दिक्षु ॥ शालादिगकयोगः
सैकोवेश्मध्रुवादिर्भवेत् ॥४८॥ प्रदक्षिणं सम्मुखादलिंदं विंघाद्धुपुरस्ता
न समाश्रितं च ॥ गृहस्य पूर्वादिगतेष्वलिंदेष्ववं भवेयुर्दश षट् च भेदाः ॥४९॥
क्षपाकरे नैव गृहं पुरस्थं कुर्याद्धासे ज्ञातुं न तत्र कर्ता ॥ पतंति [illegible]
स्वन्यानि च पएए संस्छ्रयलेन तस्माद्विदमत्र चिंत्यं ॥५०॥ कृत्तिकाद्यं मघाद्यं च मैत्रा
द्यं वासवादिकं ॥ क्षपाकरादिशः प्रोक्ता वर्ज्ये नेयाः प्रयत्नतः ॥ ५१ ॥ आषाढे चैत्रा
श्विन्यभिषुऊर्जे माघ ज्येष्ठेषु सप्तोष्ठपदेषु नूनं ॥ निकेतनानां घटनं नृपाणां

योगेश्वराचार्यमतेन सिद्धं ॥५२॥ शोकोधान्यं मृतिपशुहतिर्द्रव्यवृद्धि
र्विनाशोयुद्धं मृत्युक्षतिरथ धनं श्रीश्चवन्हेर्भयं च ॥ लक्ष्मीप्राप्तिर्भवे
तिच भवनारंभकर्तुः क्रमेण चैत्राद्ये मासे निरिति फलं वास्तुशास्त्रोपदिष्टं ५३
शस्तं पशुगृहं ज्येष्ठे आश्विने धान्यनीडकं ॥ पानीयशालिकामाघे चैत्रे धारा
गृहं तथा ॥५४॥ वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके ॥ सूत्रारंभः
शिलान्यासः स्तंभारोपः प्रशस्यते ॥५५॥ कर्किनक्रहरिकुंभगतेर्के पूर्व
पश्चिममुखानि च कुर्यात् ॥ तौलिमेषवृषवृश्चिकयाते दक्षिणोत्तरमु
खानि गृहाणि ॥५६॥ अन्यथा यदि करोति दुर्मतिर्व्याधिशोकभयहानि

र॰मा मश्नुते ॥५७॥ मीनचापमिथुनांगनागते कारयेन्न गृहमेव भास्करे ॥ नभ
१६ स्यादिषु मासेषु त्रिषु त्रिषु यथाक्रमं ॥ पूर्वादिषु शिरो वास्तोः कुर्यान्नेदृङ्मुखं
गृहं ॥५८॥ प्रतिकूलमुखं गेहं दुःखशोकभयप्रदं ॥ सर्वतोमुखगेहानामे
ष दोषो न विद्यते ॥५९॥ कर्मसिद्धिस्त्वखायुषि निमित्तशकुनादिभिः ॥ ज्ञा
त्वा शुभे गृहारंभे कीर्तयेत्समयं बुधः ॥६०॥ धर्मे स्थिरे वा भवने विलग्ने सौम्य
ग्रहे युक्तनिरीक्षिते च ॥ कर्मस्थिते वीर्ययुते च सौम्ये निर्माणमाहुर्भवनस्य
संतः ॥६१॥ पापैस्त्रिषष्ठायगतैस्त्रिकोणकेंद्राश्रितैः साधुभिरायुषस्य ॥ १६
वदंति निर्माणमिहाष्टमस्थः क्रूरस्तु कर्तुर्मरणं करोति ॥६२॥ त्रिषष्ठा

यगतैः क्रूरैः शुभैः केंद्रत्रिकोणगैः ॥ शुभदं गृहनिर्माणं क्रूरो मृत्युकरोष्टमः ॥६३
रवौ गृहस्थो गृहिणी शशांके धनं सिते देवगुरौ च सौख्यं ॥ विनाशमायाति बले
नाहीने नीचस्थिते वास्तमुपागते च ॥६५॥ विशाखायाश्च तुर्यांशे यावत्ति
ष्ठति शीतगुः ॥ तावन्नीचंगतो ज्ञेयः परतो नैव दोषभाक् ॥६६॥ अस्तदोष
स्तेन ग्राह्यः प्रतिदैवस्तिको बुधैः ॥ नास्तदोषस्तदा भानोर्मैत्रपौष्णस्य नीच
ता ॥६७॥ प्लक्षोदुंबरचूताख्या निघ्नस्तु हि बिभीतकः ॥ दग्धाः कंटकिनो वृ
क्षा वटाश्वत्थकपित्थकाः ॥६८॥ अगस्तिशिंशुतालाख्याश्चिंचिणीकाश्च निं
दिताः ॥ अन्येतु गृहनिर्माणे योजनीयाः सदा द्रुमाः ॥६९॥ वृक्षच्छेदनमा
र्थना ॥

र॰मा॰ यानीह भूतानि वसंति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तं॥ अन्यत्र वासं परिकल्प
१८ यंतु क्षमंतु तान्यपि नमोस्तु तेभ्यः॥६९॥ अन्यवेश्मस्थितं दारु नैवान्य
स्मिन्प्रयोजयेत्॥ नूतने वसते भूतो वसन्नपि न जीवति॥७०॥ नूतने
नूतनं श्रेष्ठं जीर्णे जीर्णं प्रशस्यते॥ जीर्णे च नूतनं श्रेष्ठं न जीर्णं नूतने
शुभं॥७१॥ इष्टकाकाष्ठपाषाणमृत्तिकाचूर्णलायसं तृणं पत्रं बुधैः प्रोक्तं
सदा सद्गृहायवे॥७२॥ श्रीपर्णी रोहिणीशाकसर्जाश्वरसलांपुन्नागाः॥ १८
पतंगरोघशालतालखास्त्लाखार्जुनशिंशपाः॥७३॥ चंदनाशोकवदरी श
मधूकाश्च कदंबकः॥ प्रशस्ताश्च शमी निंब बिल्वो वर्ज्यो गृहांतिके॥७४

१९४

न्यग्रोधोदुंबराश्वत्थप्लक्षाः पूर्वादितः शुभाः॥ आसन्नकंटकक्षीरफली दुःख
प्रदस्तरुः॥७५॥ संवर्धयेद्यदा गेहं ततः समंताद्वर्धयेत्तुल्यं॥ एकदेशे दोषः प्राग
थवा पुत्तरे कुर्यात्॥७६॥ गृहायुर्योगाः॥ उदये गुरुररस्तगृहे शशिजः सहजे तु
शनिस्तुरविश्च रिपौ॥ जलगश्च सितो भवनस्य तदा शरदां शतमायुरुशंति बुधाः॥
७७॥ यदि विलग्नतो भृगुजो बरे शशिसुतं खलु केंद्रगतो गुरुः॥ दिनकरोयगु
तश्च तदा बुधैः शतमितायुरुदीरितमालयं॥७८॥ लग्ने भृगुः पुत्रगतश्च जी
वः षष्ठः कुजस्तिग्मरुचिस्तृतीयः॥ निवेशने यस्य गृहस्य तद्धि शतद्वयं तिष्ठति
वत्सराणां॥७९॥ शशांकजीवौ ख१० रसातल४ स्थौ कुजार्कजौ लाभगतौ
चयस्य॥ प्रारंभकाले भवनस्य तस्य स्थितिर्निरुक्ता शरदामशीतिः॥८०

१९५

र॰मा॰
१८
चिरं॰

स्वोच्चवर्तिनिशगेऽपि विलग्नगे देवमंत्रिणि रसातले ४ च वा॥ स्वोच्चगे रवि
सुतेऽथवाऽऽयगे स्यात्स्थितिः खलु सह श्रिया॥ ८१॥ स्वर्क्षे चंद्रे लग्नगे केंद्रगे
ज्ये लक्ष्मीवत्स्यात्तद्गृहं भूरिकालं॥ मित्रस्वोच्चांशस्थितैः खेचरैश्च नी
चारिस्थैर्जायते निर्धनत्वं॥ ८२॥ एकोऽपि नूनं परभागवर्ती रिपुस्थरस्थः
खचरोऽब्दमध्ये॥ करोति गेहं परसात्तदानं स्याद्दुर्बलश्चेदिह वर्णनाथः॥८३
तिथिवारर्थकेनं॥ एकादशी द्वितीया पंचमी सप्तमी तृतीया च॥ प्रतिपद्द
शमी त्रयोदशी पौर्णमासी च॥ ८४॥ सूर्येंदुबुधेंदुजीवानां भार्ग
वस्य च वासरे॥ सूत्रपातादिकं कार्यं संपत्तिमभिवांछिता॥ ८५॥ ॥ १८

१९६

नैऋत्यांशस्त्रमंदिरं॥२

त्रि ३ वेदा ४ ब्धि ४ त्रि ३ वेदा ४ ब्धि ४ त्रि द्वि भे घर्कलः शशी॥ श्रीरुद्रसः स्थितिर्व्या
धिः नैऋत्ये श्रीः श्रीमृत्तिर्दोषे॥ ८६॥ स्नानागारं दिशि प्राच्यां आग्नेयां पचनालयं॥
याम्यायां शयनागारं वायव्यां पशुमंदिरं॥ ८७॥ प्रतीच्यां भोजनागारं भांडकोशं
तूत्तरस्यां ईशान्यां देवमंदिरं॥ ८८॥ गोधान्यदेवाग्निगुरूपरिष्टात्स्वपेन्न चैवा
परेपूर्वमूर्धा॥ न चानुवंशोन जलाद्रपादः श्रियोऽभिलाषी पुरुषो न नग्नः॥ ८९
केचिद्दशांकोद्दशभतेः वास्तुपुरुषो यत्र कोष्ठे सूत्र॥ संपातः स वंशो मर्मस्थानं॥
॥९०॥ इति वास्तुप्रकरणं॥ ॥ आदितः श्लोकः॥ ८०६॥ श्रीगणेशाय नमः॥
अथ प्रवेशो नवमंदिरस्य यात्रानिवृत्तौ वध भूपतीनां॥ सौम्यायने पूर्वदि
ने विधेयं वास्तुर्चनं भूतबलिं च तद्वत्॥ १॥ सौम्यायने श्रावणमार्गपौषेज

१९८

र॰मा॰ जन्मर्क्षलग्नयोपचयगोदयांशे॥ वामंगतेर्कैगृहवास्तुपूजांकृत्वाविशेद्वेश्म
९९ भकूटशुद्धे॥२॥ प्रवेशोमध्यमोज्ञेयोनभःकार्तिकमासयोः॥ माघफाल्गु
नवैशाखज्येष्ठमासेषुशोभनः॥३॥ चतुर्दशीचतुर्थीचनवमीचतथा
ष्टमी॥ षष्ठीचद्वादशीचैवशुभकार्येनशोभना॥४॥ भूतांककृतवशार्क्कौ
कदशनाड्यःक्रमेणतु॥ तासांवर्ज्याःशुभेकार्येशेषानाड्यस्तुशोभनाः॥५
शुभःप्रवेशोमृदुभिर्ध्रुवर्क्षैःक्षिप्रैश्चरैःस्यात्पुनरेवयात्रा॥ उग्रैर्नृपोदा
रुणभैःकुमारोराज्ञीविशाखासुविनाशमेति॥६॥ पुष्येमैत्रेमृदुस्वा ९९
त्यांध्रुवेत्वाष्ट्रेचवायुभे॥ वासवद्वितयेश्रेष्ठंगृहग्रामप्रवेशनं॥७॥

प्रवेशोनूतनेहर्म्येत्वपूर्वइतिकथ्यते॥ सपूर्वस्तुप्रयाणांतेपूर्वापूर्वोन्यउच्य
ते॥८॥ प्रवेशोनूतनेहर्म्येध्रुवैर्मैत्रैःसुखाप्तये॥ पुष्यस्वातीयुतैस्तैश्चजीर्णे
सद्वासवद्वयैः॥९॥ अपूर्वसंज्ञंप्रथमंप्रवेशंयात्रावसानेचसपूर्वमेव॥ द्वंद्वाह्व
यंचाग्निभयादिजातंगृहप्रवेशंत्रिविधंवदंति॥१०॥ अपूर्वप्रवेशोगृहारंभधि
ष्ण्यैर्विधेयःकरोमध्यमोत्रेतिकेचित्॥ अपूर्वःस्थिरैर्मैत्रभैरेवशुद्धैरतोश्विमू
लोत्तरारंभभैश्च॥११॥ भू१ वेद४ पंचकं५ त्रिरुद्धि३।३।३॥ प्रवेशेकलशेर्कभा
त्॥ मृतिर्गतिर्धनंश्रीःस्यात्वैरंशुक्रुस्थिरतासुखं॥१२॥ कृत्तिकासुभवनं
कृशानुनादह्यतेप्रविशतोनसंशयः॥ यन्मुखंचसदनंचतत्ककुप्द्वारभेषुशु
भकृत्प्रवेशनं॥१३॥ सर्वग्रहैर्विमुक्तंप्रवेशभंत्यज्यतेप्रयत्नेन॥ कैश्चित्सौम्य

समेतं शुभदं कीर्तितं मुनिभिः ॥१४॥ रिक्तातिथिभूसुतभानुवासरौ निंद्याश्च
योगाः परिवर्जनीयाः ॥ मेषः कुलीरो मकरस्तुला च त्याज्याः प्रवेशेऽपि तथा त
दंशाः ॥१५॥ मेषयाने घटो व्याधिः धान्यहानि मृगे गृहे ॥ विशतां कर्कटे नाशः
शेषलग्नेषु शोभनं ॥१६॥ निंदिता अपि शुभांशा समेतास्तौलिमेषमकराः स
कुलीराः ॥ कर्तृभोचयगाश्च विलग्ने राशयः शुभफलाश्च भवंति ॥१७॥ त्रि
कोणकेंद्रगैः शुभैः रंकेटकाष्टमांत्यगैः ॥ असद्ग्रहैः स्थिरोदये गृहं विशेद्बलेवि
धोः ॥१८॥ नैरुज्य दारिद्र्य विभूति कारी बंध्यात्मदेषि कलत्रघाती ॥ प्राणापहा १००
री पितृकं स दश्च सिध्यर्थदो भीतिकरः क्रमेण ॥१९॥ जन्मलग्नात् जन्मरा
शेः सकाशात् दशभावफलं ॥ राशिर्लग्नगतो जन्मराशेः जन्मादयात्तथा २०

कीर्तितौ मुनिभिर्वेश्मप्रवेशः शौनकादिभिः ॥२०॥ केंद्रत्रिद्व्यायेषु शुभैः क्रूरैःष
ट्त्र्यायगैर्गुरौ ॥ लग्ने स्थगो च केंद्रवा स्थिरग्राम्योदये विशेत् २१ पुनर्वसौ
च सूतिकागृहस्य निर्मितिः स्मृता ॥ चित्रिं चिविशुभांतरप्रवेशनं शुभावहं २२
पुनर्वसोन्तपादीनां कर्तव्यं सूतिकागृहं ॥ श्रवणाभिजितोर्मध्ये कर्तव्यं च प्र
कखवेशनं ॥२३॥ कृत्वाविप्रान्सजलीलांश्चाग्रतो वामतोर्कं स्वातं स्वर्ग्धि विमल
ल वसनो मंगलैर्वेदघोषैः ॥ व्यस्ते यात्रा विहितशकुने द्वारमार्गेण राजा हर्म्ये
पुष्पप्रकररुचिमत्तोरणाढ्यं विशेच्च ॥२४॥ लग्नात्सागादितो दिक्षु द्वौ
द्वौ राशी निवेशयेत् ॥ एकमेकं न्यसेत्कोणे सूर्यं वामे विचिंतयेत् ॥२५॥ रं
धो ८ सुत्रा ५ हुना २ दायाः ॥ पंचस्य कोष्ठिते क्रमात् ॥ पूर्वाशाभिमुखं गेहं

विशेद्गृहमेभिर्ध्रुवमृदुतः॥२६॥ नतो नृपो भिन्नरूद्र सुरोधसः शिल्प्यर्कभृग्गो
ऌविदेश्वलिङ्गिनः॥ धनेश्वरस्तैः पशुभिः समर्चयेत् सदा धदीनान् पुरवा
सिनस्तथा॥२७॥ गृहप्रवेशप्रकरणं॥ ॥ वस्त्रप्राप्तिस्तदपहरणं वह्नि
दाहोर्थसिद्धिराखोर्भ इति मृतिरथ धनप्राप्तिरर्थागमश्च॥ शोको मृत्यु
र्नरपतिभयं संपदः कर्मसिद्धिरिष्टावाप्तिः सदृशानमथो वल्लभत्वं ज
नानां॥१॥ मित्राप्तिरंबरहृति सलिलाप्लुतिश्च रोगाप्तिमिष्टमशनं नय
नामयश्च॥ धान्यं विषोद्भवभयं जलभीर्धनं च मित्राप्तिरंबरधृतेः फल
मश्विनीभात्॥२॥ निवसंत्यमरा हि वस्त्रकोणे मनुजाः पाशदशांतम
ध्ययोश्च॥ अपरेपि च रक्षसां त्रयोंशाः शयने चासनपादुकासु चैवं॥३॥

भेर्वोरेवानिंद्येप्यात्कुर्न्नूतनं नव्ये वस्त्रे धन्ये॥५
वस्त्रप्राप्तिर्दैवतो शेनराशेः पुत्राप्तिः स्याद्राक्षसांशे च मृत्युः॥ प्रांते सर्वांशेष्व
निष्टं फलं स्यात् प्लुष्टे वस्त्रे नूतने साध्वसाधु॥४॥ कर्दमकज्जलगो
मयलिप्ते वा ससि दग्धवतिस्फुटिते वा॥ चिंत्यमिदं नवधाविहिते
स्मिन् श्रेष्ठमनिष्टफलं च सूरिभिः॥५॥ विप्रादेशाद्वुद्वाहे क्ष्मापालेन
प्रीत्या दत्तं॥६॥ इति वस्त्रप्रकरणं॥ अथामरस्थापनमुत्तरायणे त्वदेववा
रक्षे तिथिक्षणेषु॥ सिते च पक्षेशशितारयोर्बले विधौ विलग्ने च शुभावलो
किते॥१॥ रोहिण्युत्तरपौष्णवैष्णवकरादित्याश्विनी वासवान् राधेंद्वजी
भेषु गदितं विष्णोः प्रतिष्ठापनं॥ पुष्यश्रुत्यभिजित्सु रेश्वरकयोर्वित्ताधि
पस्कंदयोर्मैत्रे तिग्मरुचेः करे निरृति भे दुर्गादिकानां शुभं॥२॥ गणप

मु·मा रिचुद्रक्षोयक्षभूतेश्वराणांअमथफणिसरस्वत्यादिकानांचपोष्ठे॥ अवसिष्ट
१०२ गतनाम्नो वा स्वेच्छेरूपानां निगदितमखिलानां स्थापनं च प्रवेषु॥३॥ सप्तर्षयो
यत्र चरंति धिष्ण्ये कार्या प्रतिष्ठा खलु तत्र तेषां॥ श्रीव्यासवाल्मीकिघटोद्भवानां
तथा स्मृता वाक्यविभेयहाणां॥४॥ सिंहोदये दिनकरो मिथुने महेशो नाराय
णश्च युवतौ धटभे विधाता॥ देव्यो द्विमूर्तिभवने च निवेशनीयाः क्षुद्राश्चरे
स्थिरे गृहे निखिलाश्च देवाः॥५॥ तेजस्विनी क्षेमकृदग्निदाहे विधायि
नी स्याद्दूरदा दृढा च॥ आनंदकृत्कल्पनिवासिनी च सूर्यादिवारेषु भवे १०२
प्रतिष्ठा॥६॥ केंद्रत्रिकोणभयमूर्तिषु सद्ग्रहेषु चंद्रार्कभौमशनिषु
त्रिषडायगेषु॥ सान्निध्यमेति नियतं प्रतिमासु देवः कर्तुः सुखार्थ

सुखसंपदरोगिता च॥७॥ बलान्विते गुरौ भौमे सबले सूतधर्मगे॥ रवौ लग्नगते स्था
प्यः शंकरः शंकरो भवेत्॥८॥ जीवे चतुष्टयस्थे विष्णोः केंद्रे बुधे भृगौ हिबुके॥ स्था
प्या विधिवत्प्रतिमाः कुमारक्षैत्रे यद्रसूर्यीणां॥९॥ शुक्रे लग्ने नवम्यां तु सब
लेंदौ कुजे खगे॥ बृहस्पतौ च सबले देवानां स्थापनं हितं॥१०॥ शनौ बलान्वि
ते यैर्वीहीनौ भौमशनैश्चरौ॥ प्रासादभेदं कुर्वंति कर्तुर्दुःखामयप्रदाः॥११
सौम्यालग्नाद्याश्रिता मूर्तिपूर्वान्भावान्वीर्यैरुत्कटा वर्धयंति॥ षष्ठं
हित्वा भावमेते हितत्रशत्रुध्वंसिं कर्तुरुत्सादयंति॥१२॥ इति देवप्रतिष्ठा
प्रकरणं॥ अथ प्रकरणानुक्रमणिका संवत्सरादितिथिवारगुणास्त
गशांकजौ॥ भूगे मेषे भृगे चेंदौ मूर्तिं जीववतिं न्यसेत्॥११॥ केंद्रादिपुत्रधर्मस्थाः सूर्य
भौम+ शोध ४

र॰मा॰ तस्य योगाभिधानकरणं करणप्रशंसा ॥ भानोः फलानि तदनुक्षणजा गुणाश्च
१०२ पश्चादुपग्रहफलं रविसंक्रमश्च ॥ १ ॥ स्याद्गोचरः शशिबलं च विलग्नचिंता सं
स्कारजाश्च विधयोऽथ नृपाभिषेकः ॥ यात्रा विवाहविधिरायतनिवेशो वेश्म
प्रवेशनवधूवस्त्रस्य प्रतिष्ठा ॥ २ ॥ इति ललितवृत्तैर्निर्मलां रत्नमालां मुद
हरदधिकार्यां सद्गुणां रत्नकोशात् ॥ निजगुरुपदभक्तः श्रीपतिः शास्त्रदक्षः १०२
चतुरगणककंठे राजतामुज्ज्वलश्रीः ॥ ३ ॥ स्फुटतया श्रीपतिबद्धयानया
कंठस्थया ज्योतिषरत्नमालया ॥ अलक्षणोप्यर्थपरिच्युतोलसभा स
सु भूम्नां गणको विराजते ॥ ४ ॥ भ्रातर्यतनविप्रनिमित्तं शास्त्रमेतदिति

206

मा वृथा त्यज ॥ आगमोयमृषिभाषितभाषितार्थतो न परं किमपि भाषितं मया
॥ ५ ॥ इति श्री श्रीपतिभट्टविरचितायां ज्योतिषरत्नमालायां समाप्तिमगमत्
॥ रसाब्ध्यश्वचंद्रोन्मिते १७४६ तारणाख्येयने दाक्षिणाख्ये शुचौ कृष्णप
क्षे ॥ शनौ मीनकेतौ तिथौ शंभुधिष्ण्ये लिखद्रत्नमालामिमां विश्वनाथः ॥ १ ॥ रो
काशिनाथेन भट्टेन त्र्यंबकाचार्यसूनुना ॥ लिखिता रत्नमालेयं परस्य पठना
र्थं भवत्विति ॥ १ ॥ लेखकपाठकयोः शुभं भवतु ॥ श्रीरस्तु ॥ छ ॥ छ ॥ छ ॥

207

॥इतिरत्नमालासमाप्तः॥श्रीरस्तु॥शुभंभवतु॥